No. ४७३६

Title रजोदर्शनशान्तिः

Author *

Extent २८ पत्राणि Age *

Subject धर्मशास्त्रम्

रजोदर्शनपुंसवनादिः गर्भाधानान्ता

४७३६

4736

पद्धति

॥रजोदर्शनशान्तिप्रारंभः॥छ



श्रो॰भं॰ श्रीगणेशायनमः॥रजोगमाय षष्टोकरणानिनंतरंपंचमादिदिने चंद्रताराद्यानु
१ कूल्ये शुचिदेशे सुस्नातः पत्न्यायुक्तः पतिः प्राङ्मुख उपविश्य प्राणानायम्य देशकालौ।
स्मृत्वा मम पत्न्याः प्रथमरजोदर्शनेऽमुकदुष्टमासादिसूचितसकलाऽरिष्टनिरास
नद्वारा श्रीपरमेश्वरप्रीत्यर्थं सगृह्यमुखशौनकोक्तां शान्तिं करिष्ये॥ इतिसंकल्प्य॥
गणेशपूजनं पुण्याहवाचनं गौर्यादिषोडशमातृकापूजनं ब्राह्म्यादिसप्तमातृकापू
जनं नान्दीश्राद्धानि कृत्वा। आचार्यं वृणुयात्। अमुकप्रवरान्विताऽमुकगोत्रोत्पन्नोऽहं
अमुकशर्माऽमुकप्रवरान्वितममुकगोत्रोत्पन्नममुकवेदान्तर्गतअमुकशाखाध्यायिनममुक राम॰
शर्माणं ब्राह्मणं अस्मिन् रजोदर्शनशान्तिकर्मणि त्वामहं वृणे। इतोस्मीत्युक्त्वा। आ १
चार्यस्तु यथा स्वर्गे शक्रादीनां बृहस्पतिः। तथा त्वं मम यज्ञेस्मिन्नाचार्यो भव सुव्रत

स्थान मार्जीत्य सर्वदा ३

थिवब्रह्मणं वृणुयात् । ततोचत्वारोध्वैमवास्त्विजोवृणुयात् । ततः गंधादिभिरभ्यर्च्य । ततः
प्राणायम्य देशकालौ संकीर्त्य अमुककर्माङ्गत्वेन यजमानवृत्तोहं आचार्यकर्म करिष्ये ।
गौरसर्षपान्विकिरेत् । तत्रमंत्रः । यदत्रसंस्थितं भूतं स्थानं त्यक्त्वा तु तत्सर्वं यत्रस्थं तत्र गच्छतु
।।१।। अपक्रामंतु भूतानि पिशाचाः सर्वतो दिशं । सर्वेषामविरोधेन ब्रह्मकर्म समारभेत् ।२।
शुरोचतआ शुचीवोहव्यामरुतः शुचीनां शुचीं हिनोम्यध्वरं शुचिभ्यः । ऋतेन सत्यमृत
सापआयं शुचीजन्मानः शुचयः पावकाः । अग्निः शुचिव्रततमः शुचिर्विप्रः शुचिःकविः ।
शुचीरोचत आहुतः । उदग्ने शुचयस्तव शुक्रा भ्राजन्त ईरते । तव ज्योतींष्यर्चयः । आपोहि
ष्ठामयोभुवस्तान ऊर्जे दधातन । महेरणाय चक्षसे । योवः शिवतमो रसस्तस्य भाजय
तेहनः । उशतीरिव मातरः । तस्मा अरंगमामवो यस्य क्षयाय जिन्वथ । आपोजनय

अ०म० याव्वनः। एतैर्मंत्रैः कुशैः पंचगव्येन प्रोक्षणं कार्यं। स्वस्त्ययनं तार्क्ष्यमिति ऋग्वेयन देवयजं
२ नसंप्रार्थ्य देवा आयांतु धाना अपयांतु विघ्नो देवयजनं रक्षस्व॥ ततः अग्न्युत्तारणं कुर्या
त्। ओं दो अग्निपदरहितं पश्चात्। अग्निपदसहितं अग्निः सप्तिमिति सूक्तेन प्रतिमां परि
स्नाभिषेकं कुर्यात्। ततः प्रतिमायाः प्राणप्रतिष्ठापने विनियोगः। अस्तु नीते पुनरस्मि
ति। अस्ये प्राणाः प्रतिष्ठंतु अस्ये प्राणाः क्षरंतु च। अस्यै देवत्वमर्चायै स्वाहा सुप्रतिष्ठितम
स्तु। इति प्राणप्रतिष्ठा। कृष्णसरल्यावल्यां। मित्रे जुहोनास्ति। प्रतिमास्य देवतायानामग्रह
णे न कर्तव्यमिति यावत्। ईशान्यां स्वस्तिकानि कुर्यात्। तत्र महिद्यौ रिति मंत्रा स्तत्या त्रिपुस्था राम
नेषु भूमिं स्पृष्ट्वा ओषधयः। समितिद्रोण परिमाणं व्रीहीं निक्षिप्य। आकालशे ष्विति त्रीणि २
कलशानि निधाय। प्रसुप्त आप इति न वर्चस्य सूक्तस्य सिंधुक्षित्प्रैयमेधो नद्यो जगती। कल

शापूर्वकपूरकेण विनियोगः॥ ॐ प्रसुवआपोमहिमानमुत्तमंकारुर्वोचातिसदनेविवस्वतः।
प्रसप्तसप्तत्रेधाहिचक्रमुःप्रसृत्वरीणामतिसिंधुरोजसा।प्रतेरदद्वरुणोयातवेपथःसिं
धोयद्वाजांऽअभ्यद्रवस्त्वंभूम्याऽअधिप्रवतायासिसानुनायदेषामग्रंजगतामिरज्य
सि।दिविस्वनोयततेभूम्योपर्यनंतंशुष्ममुदियर्तिभानुना।अभ्रादिवप्रस्तनयंतिवृष्टयः
सिंधुर्यदेतिवृषभोनरोरुवत्।अभित्वासिंधोशिशुमिन्नमातरोवाश्राऽअर्षंतिपयसे
वधेनवः।राजेवयुध्वानयसित्वमित्सिचौयदासामग्रंप्रवतामिनक्षसि।इमंमेगंगेय
मुनेसरस्वतिशुतुद्रिस्तोमंसचतापरुष्ण्या।असिक्न्यामरुद्वृधेवितस्तयार्जीकीयेशृणु
ह्यासुषोमया।सितासितेसरितेयत्रसंगतेतत्राप्लुतासोदिवमुत्पतंति।येवैतन्वंविसृजं
तिधीरास्तेजनासोऽमृतत्वंभजंते॥१॥तद्धाम यत्प्रेमयानवेसजंसुसत्वोरसयाम्येत॥

थ१

त्वाँतंसिंधोकुभयागोमतींक्रुमुंमेहत्न्वासरथंयाभिरीयसे।ऋजीत्येनीरुशतीमहित्वा
२ परिज्रयांसिभरतेरजांसिअदब्धासिंधुरपसामपस्तमाश्वानचित्रावपुषीवदर्शता॥
स्वश्वासिंधुःसुरथासुवासाहिरण्ययीसुकृतावाजिनीवती।ऊर्णावतीयुवतिःसीलमा
3 स वत्युताधिवस्तेसुभगामधुवृधं।सुखंरथंयुयुजेसिंधुरश्विनंतेनवाजंसनिषदस्मिन्ना
जौ॥महान्ह्यस्यमहिमापनस्यतेदब्धस्यस्वयशसोविरप्शिनः॥२॥याःप्रवत्तस्यस्य
वेसिषेनद्यःशङ्करि।कलशापूर्ण्य॥ॐयाःप्रवतोनिवतउद्वतउदन्वतीरनुदकाश्च
याः।ताअस्मभ्यंपयसापिन्वमानाःशिवादेवीरसिपदाभवंतुसर्वानद्योअसिमिदा एमः
भवंतु।गंधद्वारांदुराधर्षांनित्यपुष्टांकरीषिणीं।ईश्वरींसर्वभूतानांतामिहोपह्वयेश्रि २
यं।अनेनमंत्रेणत्रिषुकलशेषुगंधंदद्यात्।ओषधयःसमिति।यवान्निदद्यात्।याओ

षधीरिति सर्वौषधीन्निक्षिप्य ॥ ततो मध्यमकुंभे व्रीहियवतिलमाषमुद्गकंगुश्या
माकां निक्षिपेत् । ततो गायत्र्या उदुंबरः कुशाः दूर्वा रक्तोत्पलचंपकविल्वा । विष्णुक्रांतातु
लसीबर्हिषशंखपुष्पी । शतावरी । अश्वगंधा निर्गुंडी रक्तपीतसर्षपः । अपामार्गपलाश
पनसाजीवकाप्रियंगुगोधूमव्रीहिअश्वत्थदधि । दुग्धघृतपद्मपत्रनीलोसैसितरक्तश्री
तकुरंटकः गुञ्जावचाभद्रमुस्तारव्यानि द्वात्रिंशदौषधानि सर्वाणि यथासंभवानि क्षि
पेत् ॥ ततः त्रिषु लेशेषु कोणात्कोणादिति दूर्वाः । अश्वत्थे व इति पंचपल्लवान् गजाश्वारथ्या
नरथ्यावल्मीकसंगमहृद्गोष्ठस्थानमृदः । स्योना पृथिवीति क्षिप्त्वा । याः फलिनीरिति पूगी
फ फलानि । सहिरत्नानीति कनककुलिशनीलपद्मरागमौक्तिकानि । पंचरत्नानि निक्षिपेत् ।
हिरण्यरूप इति हिरण्यं क्षिपेत् । युवा सुवासा इति मंत्रेण वाससा च कलशं कंठान्वेष्टयेत्

गंधाक्षतपुष्पमालादिभिः कलशान् प्रपूजयेत् । पूर्णादर्विति पूर्णपात्रं निधायाग्र मध्यमकुं
४ भे गायत्र्या विश्वामित्रो भुवनेश्वरी गायत्री भुवनेश्वर्यावाहनादौ वि० । तत्सवितुः भुवने
श्वरीं आवाहयामि । तद्दक्षिणकलशे । इंद्राणीमासामिति इंद्राणी पंक्तिः इंद्राण्यावाहना
दौ विनियोगः । ॐ इंद्राणीमासु नारिषु सुभगामहमश्रवं । नह्यस्या अपरं चन जरसा मरते पतिः
5 विश्वस्मादिंद्र उत्तरः । इंद्राणीमावाहयामि । तदुत्तरतः इंद्रत्वा विश्वामित्र इंद्रो गायत्री इंद्रस्याव
हनादौ वि० । इंद्रत्वा वृषभं वयं सुते सोमे हवामहे । स पाहि मध्वो अंधसः । इंद्रमावाहया
मि । ततः उक्तमंत्रैरुक्तक्रमेण षोडशोपचारैः पूजां कुर्यात् । ततो मध्यमकुंभे आचार्यो
ऽष्टसहस्रं अष्टोत्तरशतं वा गायत्रीं जप्त्वा श्रीसूक्तं जपेत् । तद्यथा हिरण्यवर्णामिति पंच राम:
दशर्चस्य सूक्तस्य कर्दमानंदचिक्लीतेंदिरासुता ऋषयः श्रीर्देवता आद्या अनुष्टु ४

मास्ततएकाप्रस्तारपंक्तिः ॥ ततोद्वेत्रिष्टुभौशेषाः प्रस्तारपंक्तिः जपेविनियोगः । ॐ हिरण्यव
र्णांहरिणींसुवर्णरजतस्रजां । चंद्रांहिरण्मयींलक्ष्मींजातवेदोममावह ॥ तांमआवहजा
तवेदोलक्ष्मीमनपगामिनीं । यस्यांहिरण्यंविंदेयंगामश्वंपुरुषानहं । अश्वपूर्वांरथम
ध्यांहस्तिनादप्रमोदिनीं । श्रियंदेवीमुपह्वयेश्रीर्मादेवीर्जुषतां । कांसोस्मितांहिरण्यप्राका
रामार्द्रांज्वलंतींतृप्तांतर्पयंतींपद्मेस्थितांपद्मवर्णांतामिहोपह्वयेश्रियं । चंद्रांप्रभासांय
शसाज्वलंतींश्रियंलोकेदेवजुष्टामुदारां । पद्मनेमिंशरणमहंप्रपद्येअलक्ष्मीर्मेनश्यतां
त्वांवृणोमि ॥ ॥ आदित्यवर्णेतपसोधिजातोवनस्पतिस्तववृक्षोथबिल्वः । तस्यफलानि
तपसानुदंतुमायांतरायाश्चबाह्याअलक्ष्मीः । उपैतुमांदेवसखःकीर्तिश्चमणिनासह । प्रा
दुर्भूतोस्मिराष्ट्रेस्मिन्कीर्तिमृद्धिंददातुमे । क्षुत्पिपासामलांज्येष्ठामलक्ष्मींनाशयाम्यहं । अ

 

भूतिमसमृद्धिंचसर्वांनिर्णुदमेगृहात्।गंधद्वारांदुराधर्षांनित्यपुष्टांकरीषिणीं।ईश्व
५ रींसर्वभूतानांतामिहोपह्वयेश्रियं।मनसःकाममाकूतिंवाचःसत्यमशीमहि।पशूनां
रूपमन्नस्यमयिश्रीःश्रयतांयशः।।कर्दमेनप्रजाभूतामयिसंभवकर्दम।श्रियंवा
सयमेकुलेमातरंपद्ममालिनीं।आपःसृजंतुस्निग्धानिचिक्लीतवसमेगृहे।निचदे
वींमातरंश्रियंवासयमेकुले।आर्द्रांपुष्करिणींपुष्टिंसुवर्णांहेममालिनीं।सूर्यांहिर
ण्मयींलक्ष्मींजातवेदोममावह।आर्द्रांयःकरिणींयष्टिंपिंगलांपद्ममालिनीं।चंद्रांहि
रण्मयींलक्ष्मींजातवेदोममावह।।तांमआवहजातवेदोलक्ष्मीमनपगामिनीं।।यस्यां श्रीसू:
हिरण्यंप्रभूतंगावोदास्योऽश्वान्विंदेयंपुरुषानहं।यःशुचिःप्रयतोभूत्वाजुहुयादाज्यमं ५
न्वहं।[illegible]चःपंचदशींचनित्यंश्रीकामःसततंजपेत्।ततएकोस्तिश्चदक्षिणांकेमेरुद्रस्सूक्ता

नि जपेत। यथा। कद्रुद्रायेतिनर्वर्चस्यघोरः काण्वोरुद्रोगायत्री। कद्रुद्रायप्रचेतसेमीढुष्टमाय
तव्यसेवोचेमस्यंतमंहृदे। यथानोअदितिःकरत्पश्वेनृभ्योयथागवे। यथातोकायरुद्रियंयथ
यानोमित्रोवरुणोयथारुद्रश्चिकेतति। यथाविश्वेसजोषसः। गाथपतिंमेधपतिंरुद्रंज
लाषभेषजं तच्छंयोःसुम्नमीमहे। यःशुक्रइवसूर्योहिरण्यमिवरोचते श्रेष्ठोदेवानांवसुः।
शंनःकरत्यर्वतेसुगंमेषायमेष्ये। नृभ्योनारिभ्योगवे। अस्मेसोमश्रियमधिनिधेहिशतस्य
नृणां। महिश्रवस्तुविनृमणं मानःसोमपरिबाधोमारातयोजुहुरंत। आनइंदोवाजेभ
ज। यास्तेप्रजाअमृतस्यपरस्मिंधामंनृतस्य। मूर्धानाभासोमवेनआभूषंतीःसोमवेदः। ३
मारुद्रायतवसइत्येकादशर्चस्यसत्कास्यकुत्सोरुद्रआद्यानवजगत्योंत्येद्वेत्रिष्टुभौ। जपेवि०।
इमारुद्रायतवसेकपर्दिनेक्षयद्वीरायप्रभरामहेमतीः। यथासमसद्द्विपदेचतुष्पदेवि

श्वं पुष्टं ग्रामे अस्मिन्ननातुरं। मृला नो रुद्रोत नो मयस्कृधि क्षयद्वीराय नमसा विधेम ते। यच्छं
६ च योश्च मनुरायेजे पिता तदश्याम तव रुद्र प्रणीतिषु। अश्याम ते सुमतिं देवयज्यया क्षय
द्वीरस्य तव रुद्र मीढ्वः। सुम्नायन्निद्विशो अस्माकमाचरारिष्टवीरा जुहवाम ते हविः। त्वेषं
6 वयं रुद्रं यज्ञसाधं वंकुं कविमवसे निह्वयामहे। आरे अस्मद्दैव्यं हेलो अस्यतु सुमतिमिद्वयम
स्या वृणीमहे॥ दिवो वराहमरुषं कपर्दिनं त्वेषं रूपं नमसा निह्वयामहे॥ हस्ते बिभ्रद्भेष
जा वार्याणि शर्म वर्म छर्दिरस्मभ्यं यंसत्॥ ॥ इदं पित्रे मरुतामुच्यते वचः स्वादोः स्वादीयो
रुद्राय वर्द्धनं। रास्वा च नो अमृत मर्तभोजनं त्मने तोकाय तनयाय मृल। मा नो महान्तमु राम
त मा नो अर्भकं मा न उक्षन्तमुत मा न उक्षितं। मा नो वधीः पितरं मोत मातरं मा नः प्रिया ६
स्तन्वो रुद्र रीरिषः। मा नस्तोके तन[illegible]ये मा न आयौ मा नो गोषु मा नो अश्वेषु रीरिषः। वी

रान्मानोरुद्रभामितोवधीर्हविष्मन्तः सदमित्वाहवामहे।उपतेस्तोमान्पशुपाइवाक
रंरास्वापितर्मरुतांसुम्नमस्मेभद्राहितेसुमतिर्मृलयत्तमाथावयमवइत्तेवृणीमहे।
आरेतेगोघ्नउतपूरुषघ्नंक्षयद्वीरसुम्नमस्मेतेअस्तु।मृलाचनोअधिचब्रूहिदे
वाधाचनःशर्मयछद्विबर्हाः।अवोचामनमोअस्माअवस्यवःशृणोतुनोहवंरु
द्रोमरुत्वान्।तंनोमित्रोवरुणोमामहंतामदितिःसिंधुःपृथिवीउतद्यौः॥२५॥
त ओंतिपिंशतिपंचदशर्चस्यसूक्तस्यगृत्समदोरुद्रस्त्रिष्टुप्।जपे०।ॐआतेपितर्मरुतांसु
म्नमेतुमानःसूर्यस्यसंदृशोयुयोथाः।अभिनोवीरोअर्वतिक्षमेतप्रजायमहिरुद्रप्रजा
भिः॥त्वादत्तेभीरुद्रशंतमेभिः।शतंहिमाअशीयभेषजेभिः।व्यस्मद्द्वेषोवितरंव्यंहोव्य
मीवाश्चातयस्वाविषूचीः।श्रेष्ठोजातस्यरुद्रश्रियासितवस्तमस्तवसांवज्रबाहो।

पर्षिणः पारमंसं स्वस्तिविश्वा अभीतीरपसोयुयोधिमात्वारुद्रचुक्रुधामानमोभिर्मा
७ दुष्टुतीवृषभमासहूती। उंनोवीरांअर्पयभेषजेभिर्भिषक्तमंत्वाभिषजांशृणोमि।
हवीमभिर्हवतेयोहविर्भिरवस्तोमेभीरुद्रंदिषीय। ऋदूदरःसुहवोमानोअस्यैबभ्रुः
सुशिप्रोरीरधन्मनायै॥ उन्माममंदवृषभोमरुत्वांत्वक्षीयसावयसानाधमानं। घृ
णीवछायामरपाअशीयाविवासेयंरुद्रस्यसुम्नं॥ क्वस्यतेरुद्रमृलयाकुर्हस्तोयोअ
स्तिभेषजोजलाषः। अपभर्तारपसोदैव्यस्याभीनुमावृषभचक्षमीथाः॥ प्रबभ्रवेवृ
षभायश्वितीचेमहोमहींसुष्टुतिमीरयामि। नमस्याकल्मलीकिनंनमोभिर्गृणीम राम:
सित्वेषंरुद्रस्यनाम॥ स्थिरेभिरंगैःपुरुरूपउग्रोबभ्रुःशुक्रेभिःपिपिशेहिरण्यैः। ईशानाद ७
स्यभुवनस्यभूरेर्नवाउयोषद्रुद्रादसुर्यं। अर्हन्बिभर्षिसायकानिधन्वार्हन्निष्कंयज

तेविश्वरूपं। ओंर्हन्निदं दयसेविश्वमभ्वंनवा ओजीयोरुद्रत्वदस्ति॥ ओंस्तुहिश्रुतंगर्तस
दंयुवानंमृगंनभीममुपहत्नुमुग्रं। मृलाजरित्रेरुद्रस्तवानोन्यंतेअस्मिन्निवपंतुसेनाः॥
कुमारश्चित्पितरंवंदमानंप्रतिनानामरुद्रोपयंतं। भूरेर्दातारंसत्पतिंगृणीषेस्तुतस्त्वं
भेषजारायस्यस्मे॥ यावोभेषजामरुतःशुचीनियाशंतमावृषणोयामयोभु॥ यानि
मनुरवृणीतापितानस्ताशंचयोश्चरुद्रस्यवश्मि॥ परिणोहेतीरुद्रस्यवृज्याःपरित्वेषस्य
दुर्मतिर्महीगात्॥ ओंअवस्थिरामघवद्भ्यस्तनुष्वमीढ्वस्तोकायतनयायमृल॥ एवाबभ्रो
वृषभचेकितानेयथादेवनहृणीषेनहंसि॥ हवनश्रुन्नोरुद्रेहबोधिबृहद्वदेमविदथे
सुवीराः॥ ओंइमारुद्रायस्थिरधन्वनइतिचतसृणांवसिष्ठोरुद्रस्त्रिष्टुब्जगत्योंत्यात्रि
ष्टुप्जपे॥ ओंइमारुद्रायस्थिरधंन्वनेगिरःक्षिप्रेषवेदेवायस्वधाव्ने॥ ओंषाल्हायसहमा

रु

नायवेधसेतिग्मायुधायभरताश्रृणोतुनः सहितेयएतम्यस्यजन्मनः साम्राज्येनदि
८ व्यस्यचेततिः। अवंनवंतिरूपनोदुरश्चरानमीवोरुद्रजासुनो [illegible] भव। यातेदिद्युदवसृष्टा
8 दिवस्परिक्ष्मयाचरतिपरिसावृणक्तुनः। सहस्रंतेस्वपिवात भेषजामानस्तोकेषु
तनयेषुरीरिषः। मानोवधीरुद्रमापरादामातेभूमप्रसितौहीलितस्य। आनोभजब
र्हिषिजीवशंसेयूयंपातस्वस्तिभिःसदानः॥१॥ आवोराजानंवामदेवोरुद्रस्त्रिष्टुप्जप
विनियोगः। ॐ आवोराजानमध्वरस्यरुद्रंहोतारंसत्ययजंरोदस्योः। अग्निंपुरातनयि
त्नोरचिताद्धिरण्यरूपमवसेकृणुध्वं। तमुष्टुहिभोमो त्रिरुद्रस्त्रिष्टुप् जपविनियोगः। रामः
ॐ तमुष्टुहियःस्विषुःसुधन्वायोविश्वस्यक्षयतिभेषजस्य। यक्ष्वामहेसौमनसायरु ८
द्रंनमोभिर्देवमसुरंदुवस्या। भुवनस्यपितरंस्त्रजिस्वारुद्रस्त्रिष्टुप् जपेविनियोगः। ॐ भु

वनस्पतिरंगीभिराभिरुद्रंदिवावर्धयारुद्रमक्तो ब्रूहंतामध्वमजरंसुषुम्नमधगुवेमम
स्विनेषितासः॥ त्र्यंबकंवसिष्ठोरुद्रोऽनुष्टुप्॥ जपे॥ ॐत्र्यंबकंयजामहेसुगंधिंपुष्टिवर्द्धनं॥
उर्वारुकमिवबंधनान्मृत्योर्मुक्षीयमामृतात्॥ अथान्योक्तःशत्रिगुत्तरेकुंभेएकादशा
वृत्तिभिरुद्रंजपेत्॥ शंनइंद्राग्नी॥ इतिपंचदशार्चस्यसूक्तस्यवसिष्ठोविश्वेदेवास्त्रिष्टुप्॥
जपेविनियोगः॥ शंनइंद्राग्नी॥ इतिवर्गः॥ ततःकुंभपश्चिमदेशेस्थंडिले॥ अग्निंप्रणीयअग्नि
नरजोदर्शनशांतिकर्मणिस्थंडिलउपलेपनउल्लेखनाग्निप्रतिष्ठापनंकरिष्यइ
तिसंकल्पे॥ अग्निमानीतंकृत्वातद्दीशान्यांवेद्यांदोनवग्रहादीस्तन्मंत्रैरावा
ह्यातयथा॥ प्रणवस्यपरब्रह्मऋषिःपरमात्मादेवतादेवीगायत्रीछंदः॥ व्याहृतीनां
क्रमेणविश्वामित्रजमदग्निभरद्वाजभृगवऋषयःअग्निर्वायुःसूर्योदेवतादेवीगाय

श्रीदेव्युपासिकेदेवीवृहत्यन्छंदांसि। सूर्याद्यावाहनेविनियोगः। तत्रग्रहपीठमध्ये
२ वर्तुलेद्वादशांगुलेप्राङ्मुखंसूर्यंरक्तपुष्पाक्षतैः। आकृष्णेनहिरण्यस्तूपःसवि
ता त्रिष्टुप्सूर्यावाहने। ॐ आकृष्णेनरजसावर्तमानोनिवेशयन्नमृतंमर्त्यंच। हिरण्य
9 येनसवितारथेनादेवोयातिभुवनानिपश्यन्। भूर्भुवःस्वः कलिंगदेशोद्भवकाश्यपसगोत्र
सूर्यइहागच्छइहतिष्ठइतिस्थापयेत्। आग्नेय्येचतुरस्रेचतुर्विंशांगुलेप्रत्यङ्मुखेसोमंश्वेतपु
ष्पाक्षतैः। आप्यायस्वगोतमःसोमोगायत्रीःसोमावाहने। ॐ आप्यायस्वसमे
तुतेविश्वतःसोमवृष्ण्यम्भवावाजस्यसंगथे। भूर्भुवःस्वःयमुनातीरोद्भवआत्रेयस राम.
गोत्रसोमइहागच्छइहतिष्ठइति। दक्षिणेत्रिकोणेत्र्यंगुलेदक्षिणामुखंभौमंरक्तपुष्पाक्षतैः। ६
अग्निर्मूर्धाविरूपाङ्गारकोगायत्री। भौमावाहने। ॐ अग्निर्मूर्धादिवःककुत्पतिःपृ

स्विव्याजयं।अपांरेतांसिजिन्वति।भूर्भुवस्वःअवंतिसमुद्भवभारद्वाजसगोत्रभौम०।
ततईशान्येवाणाकारेचतुरंगुलेउदङ्मुखंबुधंपीतपुष्पाद्यैः।उद्बुध्यध्वंबुधःसोमसौम्बुध
त्रिष्टुप्।बुधावाहने।उद्बुध्यध्वंसमनसःसखायःसमग्निमिध्वंबहवःसनीलाः।दधिक्रा
मग्निमुषसंचदेवीमिंद्रावतोवसेनिह्वयेवः।भूर्भुवःस्वःमगधदेशोद्भवात्रेयसगोत्रबुध०।
ततउत्तरेदीर्घचतुरस्रेषडंगुलेउदङ्मुखंबृहस्पतिंपीतपुष्पाद्यैः।बृहस्पतेर्गृत्समदोब्रह
स्पतिस्त्रिष्टुप्।बृहस्पत्यावाहने०।बृहस्पतेअतियदर्योअर्हाद्युमद्विभातिक्रतुमज्जने
षु।यद्दीदयच्छवसऋतप्रजाततदस्मासुद्रविणंधेहिचित्रम्।भूर्भुवःस्वःसिंधुदेशो
द्भवांगिरसगोत्रबृहस्पते०।ततःपूर्वेपंचकोणेनवांगुलेप्राङ्मुखंशुक्रंशुक्लपुष्पाद्यैः।
शुक्रःपराशरःशुक्रोद्विपदाविराट्।शुक्रावाहने।शुक्रःशुशुक्वांउषोनजारःपपासा

स्व

मीचीदिवोनज्योतिः भूर्भुवः स्वः भोजकटदेशोद्भव भार्गवसगोत्र शुक्र० ततः पश्चिमे
१० धनुषि स्वंगुलप्रत्यङ्मुखं शनिं कृष्णपुष्पाद्यैः । शमग्निरिति विरिंचिशनिरुष्णिक्श
न्यावाहने० ॐ शमग्निरग्निभिः करच्छन्नस्तपतु सूर्यः । शं वातो वात्वरपा अप स्त्रिधः ।
भूर्भुवः स्वः सौराष्ट्रदेशोद्भव काश्यपगोत्र शनैश्चर इह० ततो नैरृत्ये शूर्पाकारे द्वादशां
गुले दक्षिणाभिमुखे राहुं कृष्णपुष्पाद्यैः । कयानो वामदेवो राहुर्गायत्री राह्वावा० ।
ॐ कयानश्चित्र आभुवदूती सदावृधः सखा । कया शचिष्ठया वृता । भूर्भुवः स्वः राठिना
पुरोद्भव पैठीनसगोत्र राहो इहागच्छ इति । ततो वायव्ये ध्वजाकारे षडंगुले दक्षिणाभिमुखं राम०
केतुं धूम्रपुष्पाद्यैः । केतुर्मधुच्छन्दाः केतुर्गायत्री केत्वावाहने० । केतुं कृण्वन्नकेतवे पेशो १०
मर्या अपेशसे । समुषद्भिरजायथाः ॐ । ॐ अन्तर्वेदीसमुद्भव जैमिनिसगोत्र केतो इह० ।

द्वौ

ततपुष्पाभावेयथाप्राप्तिः। अथाधिदेवताः॥ त्र्यम्बकं वसिष्ठोरुद्रस्त्रिष्टुप् ईश्वरावाहने वि०।
ॐ त्र्यम्बकं। रुद्र ईश्वरेश्वा०। सूर्यदक्षिणपार्श्वे ईश्वरं आवाहयामि। गौरीर्मिमाय दीर्घतमा उमा
जगती। उमावाहने०। गौरीर्मिमाय०। उमेहागच्छेति। सोमदक्षिणपार्श्वे उमां आं०। यदक्रन्दो दी
र्घतमा स्कन्दः त्रिष्टुप्। स्कन्दावाहने विनियोगः०। ॐ यदक्रन्दः प्रथमं जायमानः उद्यन्त्समु
द्रादुदतवा पुरीषात्। श्येनस्य पक्षा हरिणस्य बाहू उपस्तुत्यं महिजातं ते अर्वन्। स्कन्
देहागच्छेति। भौमदक्षिणपार्श्वे स्कन्दमावाहयामि। विष्णोर्नुकं दीर्घतमा नारायण त्रिष्टुप्।
नारायणावा०। ॐ विष्णोर्नुकं वीर्याणि प्रवोचं यः पार्थिवानि विममे रजांसि। यो अस्कभा
यदुत्तरं सधस्थं विचक्रमाणस्त्रेधोरुगायः। नारायणेहा०। बुधदक्षिणपार्श्वे नारायणमा
वाहयामि। ब्रह्मजज्ञानं गोतमो वामदेवो ब्रह्मा त्रिष्टुप्। ब्रह्मावाहने०। ॐ ब्रह्मजज्ञानं

प्रथमंपुरस्ताद्विसीमतःसरुचोवेनआवः।सबुध्न्याउपमाअस्यविष्ठाःसतश्चयोनि
११ मसतश्चविवः।ब्रह्मंनिहागछेत्ति।रहस्पतिदक्षिणपार्श्वेब्रह्मानेआवा॰।इंद्रंवोमधु
छंदाइंद्रोगायत्री।इंद्रोवाहने॰।ॐइंद्रंवोविश्वतस्परिहवामहेजनेभ्यः।अस्माकम
स्तुकेवलंइंद्रेहागछेत्ति।शुक्रदक्षिणपार्श्वेइंद्रमावा॰।यमायसोमंयमोऽनुष्टुप्छाय
मावा॰।यमायसोमंसुनुतयमायजुहुताहविः।यमंहयज्ञोगछत्यग्निदूतोअरंकृतः।
यमेहागछेत्ति।शनिदक्षिणपार्श्वेयममावाहयामि।मोषुणोघोरःकएवःकालोगा
यत्री।कालावाहने॰।ॐमोषुणःपरापरानिर्ऋतिर्दुर्हणावधीत्।पदीष्टतृष्णयासह। राम॰
कालेहागछेत्ति।राहुदक्षिणपार्श्वेकालमावा॰।उषोवाजंप्रस्कण्वऋषिस्त्रिष्टुप्छन्दोबृहती ११
त्विन्नगुप्तावा॰।उषोवाजंहिवंस्वयश्चित्रोमानुषेजने।तेनावहसुकृतोअध्वरांउपयेत्वा

गृह्णंनिवकुह्य:।चित्रगुप्तेहागच्छेति।केतुदक्षिणपार्श्वेचित्रगुप्तमावाहयामि।तत्तसुक्तादे
कुलेरेवःसर्वाःप्रत्यधिदेवता।अग्निंकाएवोमेधातिथिरग्निर्गायत्री।अन्यावारु॰।ॐअग्निं
दूतंवृणीमहेहोतारंविश्ववेदसं।अस्ययज्ञस्यसुक्रतुं।अग्नेइहागच्छेति।सूर्यवामपार्श्वेऽग्नि
ग्निंआ॰।अप्सुमेमेधातिथिरापोऽनुष्टुप्।आपावा॰।ॐअप्सुमेसोमोअब्रवीदंतर्विश्वा
निभेषजा।अग्निंचविश्वशंभुवमापश्चविश्वभेषजीः।आपःइहागच्छेति॰।सोमवामपार्श्वे
अपःआवा॰।स्योनामेधातिथिर्भूमिर्गायत्रीभूम्यावा॰।स्योनापृथिवीभवानृक्षरानिवेश
नी।यच्छानःशर्मसप्रथाःभूमेइहागच्छेति।भौमवामपार्श्वेभूमिंआ॰।इदंविष्णुर्मेधातिथि
र्विष्णुर्गायत्री।विष्णावाहने।इदंविष्णुर्विचक्रमेत्रेधानिदधेपदं।समूल्हमस्यपांसुरे।विष्णो
इहा॰बुधवामपार्श्वेविष्णुर्वामा॰।इंद्रश्रेष्टानिगृत्समदइंद्रस्त्रिष्टुप्।इंद्रावा॰।इंद्रश्रेष्ठानि

द्रविणानि धेहि चित्तिं दक्षस्य सुभगत्वमस्मे पोषं रयीणामरिष्टिं तनूनां स्वाद्मानं वाचः सु
१२ दिनत्वमन्हां ॥ इंद्रेहा० गुरुं वामपार्श्वे इंद्रमावा० ॥ इंद्राणी वृषाकपिरिंद्राणी पंक्तिः ॥ इंद्राण्या
वा० ॥ इंद्राणीमासु नारिषु सुभगामहमश्रवं न ह्यस्या अपरं चन जरसा मरते पतिर्विश्वस्मा
दिंद्र उत्तरः ॥ इंद्राणी इहागच्छेति ॥ शुक्रं वामपार्श्वे इंद्राणीमावाहयामि ॥ प्रजापते हिर
ण्यगर्भः प्रजापतिस्त्रिष्टुप् ॥ प्रजापत्यावाहने० ॥ ॐ प्रजापते न त्वदेतान्यन्यो विश्वा
जातानि परिता बभूव ॥ यत्कामास्ते जुहुमस्तन्नो अस्तु वयं स्याम पतयो रयीणां ॥ प्रजाप
ते इहा० शनिं वामपार्श्वे प्रजापतिमावा० ॥ आयं गौः सार्पराज्ञी सर्पा गायत्री ॥ सर्पावाह राम०
ने० ॥ ॐ आयं गौः पृश्निरक्रमीदसदन्मातरं पुरः पितरं च प्रयन्त्स्वः ॥ सर्पा इहागच्छंतु इति १२
ष्टेति ॥ राहुं वामपार्श्वे सर्पानावाहयामि ॥ ब्रह्मजज्ञानं गोतमो वामदेवो ब्रह्मा त्रिष्टु

प्र॥ब्रह्मावाहने॥ब्रह्मजज्ञानं॰ब्रह्मन्निहागच्छेति॥केतुवामपार्श्वेब्रह्माणमावाहयामि॥ततःश्रु
क्लैतंडुलैः विनायकादीन्सूर्यादुत्तरतः प्राक्संस्थान्‌इतिवा॥गणानांत्वागृत्समदोगणाधिप
तिर्जगती॥विनायकावा॰॥गणानांत्वास्र॰॥विनायकेहा॰राहोरुत्तरत्तो विनायकमावा॰॥जा
तवेदसेकश्यपोदुर्गात्रिष्टुप्‌दुर्गावाहने॰जातवेदसेसुनवामसोममरातीयतो निदहातिवेदः
सनः पर्षदतिदुर्गाणिविश्वानावेवसिंधुंदुरितात्यग्निः दुर्गेइहा॰॥शनेरुत्तरत्तोदुर्गामावा॰तव
वायोमम्यांगिरसोवायुगायत्री॥वायावाहने॰॥तववायवृतस्पतेत्वष्टुर्जामातरद्भुत॥अवा
स्यावृणीमहे॥वायोइहा॰॥रवेरुत्तरत्तोवायुमावहि॰॥आदित्प्रत्नस्याकाशोगायत्री॥आका
शावा॰आदित्प्रत्नस्यरेतसोज्योतिष्पश्यंतिवासरं॥परोयदिध्यतेदिवा॥आकाशइहागच्छेति ५२
राहोर्दक्षिणतः आकाशइहागच्छेतिमावा॰॥एषोउषाप्रस्कण्वोश्विनोगायत्री॥अश्व्यावाहने॰

ॐ एषोउषाअपूर्व्याव्युच्छतिप्रियादिवः। स्तुषेवामश्विनाबृहत्। अश्विनौइहागच्छतः इतिप्र
१२ कतोदक्षिणतः अश्विनौआवाहयामि। ततः क्षेत्रस्यपतिनावामदेवः क्षेत्राधिपतिरनुष्टुप्।
क्षेत्रपालवाहने। ॐ क्षेत्रस्यपतिनावयंहितेनेवजयामसि। गामश्वंपोषयित्न्वासनोमृला
13 तीदृशे। क्षेत्रपालइहागच्छति। उत्तरेक्षेत्रपालंआवा०। वास्तोष्पतेवसिष्ठोवास्तोष्पतिस्त्रिष्टु
प्। वास्तोष्पत्यावा०। ॐ वास्तोष्पतेप्रतिजानीह्यस्मान्त्स्वावेशोअनमीवोभवानः। यत्त्वेमहे
प्रतितन्नोजुषस्वशंनोभवद्विपदेशंचतुष्पदे। वास्तोष्पतेइहागच्छतिउत्तरेवास्तोष्पतिमावाहया
मि। ततोलोकपालान्इंद्रविश्वाजेतामधुच्छंदसइंद्रोनुष्टुप्। इंद्रवा०। ॐ इंद्रंविश्वाअवीवृधन्त्स राम०
मुद्रव्यचसंगिरः। रथीतमंरथीनांवाजानांसत्पतिंपतिं। इंद्रइहा०। पूर्वस्यामिंद्रया०। अग्निंका १२
एवोमेधातिथिरग्निर्गायत्री अग्न्यावाह०। अग्निंदूतंवृणीमहेहोतारंविश्ववेदसं। अस्ययज्ञस्यसु

ग्नेतु।अग्नइहा॰।आग्नेय्यामग्निंआ॰यमायसोमंःयमोयमोतु॰।यमावाह॰।यमायसोमंसुतनरः॰
दक्षिणस्यांयमंआ॰।मोषुणोघोरःकाण्वोनिर्ऋतिर्गायत्रीनिर्ऋत्यावा॰मोषुणःपरापराः
निर्ऋतेइहागच्छ॰निर्ऋत्यांनिर्ऋतिंआ॰।त्वंनोअग्नेवामदेवोवरुणःत्रिष्टुप्वरुणावा॰।त्व
न्नोअग्नेवरुणस्य॰यजिष्ठोवन्हिः॰वरुणइहागच्छ।पश्चिमस्यांवरुणं।आवाहयामि।तववा
योम्श्वांगि॰त्रीवाय्वावा॰तववायवृ॰वायोइहाग॰वायव्यांवायुंआ॰सोमोधेनुंगोतमःसो
मस्त्रिष्टुप्सोमावा॰।सोमोधेनुंसोमो॰सोमइहा॰।उत्तरस्यांसोमंआ॰।तमीशानंगोतमईशा
नावा॰।तमीशानंजगतः।ईशानइहागच्छ॰।ईशान्यांईशानंआ॰।ओं॰तदस्तुमित्रा॰।एतौवैप्रति
ष्ठास्तुत्तंतत्स्रुति॰प्रतिष्ठा।षोडशोपचारैःपूजांकुर्यात्।मंत्रपुष्पांजलिंदद्यात्।ततःईशान्येक
लशस्थापनेवरुणमावाहनंच।पूजांकुर्यातमंत्रपुष्पांजलिंदद्यात्।कलशप्रार्थना।सर्वेसमुद्राः

१४ सरित्सतीर्थानिजलदानदाः ॥ अयांतुजजमानस्यदुरितक्षयकारकाः ॥ कलसस्यमुखेवि
तिश्लोकत्रयंपठेत् ॥ देवदानवसंवादेमथ्यमानेमहोदधौ ॥ उत्पन्नोसितदाकुंभविधृतोविष्णु
नास्वयं ॥ त्वत्तोयेसर्वतीर्थानिदेवाःसर्वेत्वयिस्थिताः ॥ त्वयितिष्ठंतिभूतानित्वयिप्राणाः
प्रतिष्ठिताः ॥ शिवस्वयंत्वमेवासिविष्णुस्त्वंचप्रजापतिः ॥ आदित्यावसवोरुद्राविश्वेदेवाःस
पैतृकाः ॥ त्वयितिष्ठंतिसर्वेपियतःकामफलप्रदः ॥ त्वत्प्रसादादिमंयज्ञंकर्तुमीहेजलोद्भव ॥
सांनिध्यंकुरुदेवेशप्रसन्नोभवसर्वदा ॥ ततोन्वाधानं ॥ सामिद्भ्रपंचादायअस्मिंन्नंत्रोदर्श राम०
नसांतिहोमंकर्तुंअन्वाधानंकरिष्ये ॥ अस्मिंनन्वाहिताग्नावित्यादिचक्षुष्याज्येत्यंतमुक्त्वा १४
त्रप्रधानं ॥ आदित्यंसोमंभौमंबुधंबृहस्पतिंशुक्रंशनिंराहुंकेतुंएताप्रधानदेवताः अष्टअष्ट
संख्याकाभिःअर्कादिसमिद्भिः ॥ चरूद्वताक्ततिलाञ्जलिभिः ॥ भटनीलकंठानुमते ॥ ईश्वरंउ

दधिमधुघृत

मांस्कंदं विष्णुं ब्रह्माणं इंद्रं यमं कालं चित्रगुप्तं अग्निं अपः भूमिं विष्णुं इंद्र इंद्राणीं प्रजापतिं
सर्पान् ब्रह्माणं विनायकं दुर्गां वायुं आकाशं अश्विनौ वास्तोष्पतिं क्षेत्रपालं इंद्रं अग्निं
यमं निरृतिं वरुणं वायुं कुबेरं ईशानं एताः प्रधानदेवताः अमुकसंख्याकाभिरर्कादि
समिद्भिश्च मधुघृताक्ततिलाहुतिभिः । भुवेश्वरी प्रत्ये प्रत्येकं प्रति द्रव्येणामुकसंख्याकाभिः
तिलमिश्रगोधूमपायसाज्याहुतिभिः । इंद्राणीं इंद्रं च प्रत्येकं प्रति द्रव्येणामुकसंख्याका
भिर्दूर्वागोधुमपायसाज्याहुतिभिर्यक्ष्ये शेषेण स्विष्टकृतमित्यादि सद्योपत्ते । परिसमूहना
दि पूर्णपात्रनिधानांतं कृत्वा अमुष्मै त्वा जुष्टं निर्वपामीति यथाक्रमेण तूष्णीं चतुरो मुष्टीन् निरुप्य त
थैव प्रोक्ष्य अवघातादि पाय संश्रपयेत् । आज्यसंस्कारादि आज्यभागांतं कृत्वा । आचार्ययज
मानेन द्रव्यत्यागं कुर्यात् । अनेन संपादितेन हवनीयद्रव्येण यायायक्ष्यमाणदेवताताभ्य इदं

वनीयद्रव्यंमयापरिकल्पितेनममः। स्वस्तिक्रमभियथाक्रमेणद्रव्याणांहोमंकुर्यात्। ततःस्विष्टकृदा
१५ दिप्रायश्चित्तहोमान्तंसमाप्यबलिदानंकुर्यात्। तत्क्रमः। त्रातारमिंद्रंगर्गऋषिस्त्रिष्टुप्छंदः इंद्रप्रीत्य
र्थेबलिदानेविनियोगः। त्रातारमिंद्रम०। इंद्रायसांगायसपरिवारायसायुधायसशक्तिका
15 यइमंसदीपंमाषभक्तबलिंसमर्पयामि। भोइंद्रदिशंरक्षबलिंभक्ष यजमानस्यसकुटुंबस्यायुः
कर्ताक्षेमकर्ताशुभकर्ताशांतिकर्तापुष्टिकर्तातुष्टिकर्ताभव। एवंसर्वत्र। अग्निंकाएवोमेधा०
त्री। अग्निप्रीत्यर्थेबलिदाने० अग्निंदूतं। अग्नयेसांगाय० भोअग्नि० वरदोभव। यमायसोमंय
मोयमोनु० यमप्रीत्यर्थेव० यमायसोमंयमाय० समर्प० भोयमदिशंरक्ष० ततोनैरृतेः मो राम॰
षुणोघोरः कण्वोनि० त्रीनिरृतिप्रीत्यर्थेब० मोषुणपरा० निरृतेसांगायः भोनिरृतेदि १५
शं० पश्चिमे। तत्त्वायामिशुनःशेपोवरुणस्त्रिष्टुप्वरुणप्रीत्यर्थे० तत्त्वायामि। वरुणायसांगा

य॰ भो वरुण दिशां॰ भो वा वायव्ये तत्र वायो मश्रं गिरसो वायु॰ त्री। वायु प्रीत्यर्थं॰ तत्र वाय
वेत॰ १ वायवे सांगाय॰ भो वायो दिशां रक्ष॰ उत्तरे सोमो धेनु गौतमः सोमस्त्रिष्टुप् सोमप्रीत्य
र्थं॰ सोमो धेनुं १ सोमाय सांगाय॰ भो सोम दिक्ष॰ ईशान्यां तमीशानं गौतम ई॰ त्री ईशान प्रीत्यर्थं॰
तमीशाने १ ईशानाय सांगाय॰ भो ईशान दिशां भव। अथ ग्रहदेवेभ्यो पूर्वे। आकृष्णेन ठ०॰ सूर्य
प्रीत्यर्थं॰ आकृष्णेन रजसा १ सूर्याय सांगाय सपरिवाराय सायुधाय सशक्तिकाय ईश्वराग्नि
रूपाधिदेवता प्रत्यधिदेवता सहिताय इमं सदीपं माष भक्त बलिं समर्पयामि। भो सूर्य इमं ब
लिं गृहाण मम यजमानस्य वा सकुटुंबस्यायुः कर्त्ता क्षेमकर्त्ता शुभकर्त्ता शांतिकर्त्ता पुष्टिकर्त्ता भ
व ततो वेद्याग्नेयो अध्याय स्व गौतम॰ त्री सोमप्रीत्यर्थं आप्यायस्व॰ १ सोमाय सांगाय॰ उमाद्रूपा
धिदेवता प्रत्यधिदेवता स॰ इमं॰ भो सोम इमं बलिं गृहाण॰ दक्षिणे। अग्निर्मूर्द्धा विरू॰ त्री भौम

इमं व॰ प्रीत्यर्थं • अग्निर्मूर्द्धा० १ अंगारकाय सांगाय • स्कंद भूमिरूपाधिदेवता • सहितायइमं • ओं अं
२६ गारकाय इमं बलिं • ईशान्यां उद्बुध्यध्वं बुधः सौम्यो • बुधप्रीत्यर्थः । उद्बुध्यध्वं समनसः १ बुधाय
16 सांगाय नारायण विष्णुरूपाधिदेवता सहिताय • ओं बुध इमं बलिं • उत्तरे । बृहस्पतेगस्समदो
बृः बृहस्पतिप्रीत्यर्थं • ओं बृहस्पते अति० १ बृहस्पतये सांगाय • ब्रह्मेन्द्ररूपाधिदेवताय • ओं बृ
हस्पते इमं बलिं ग्रहाण • पूर्वे शुक्रः पराशरः शुक्रो • शुक्रप्रीत्यर्थे • ओं शुक्रः शुशुक्वां० • शुक्रा
य सांगाय • इंद्र इन्द्राणीरूपाधिदेवताय • ओं शुक्र इमं ब० • वः पश्चिमे । शमग्निरिरिंबि • कः शनिप्रीत्य
र्थं • शमग्निरग्निभि० • शनिश्चराय सांगाय • यमप्रजापतिरूपादिदेवताय • ओं शनैश्चर इमं • राम॰
मं ब नैर्ऋत्यां केयानो वामदेवो राहुर्गायत्री राहुप्रीत्यर्थः कयान • राहवे सांगाय • कालसर्प २६
रूपाधिदेवताय • ओं राहो इमं ब • वायव्यां केतुर्मधुच्छंदाः केः त्रीकेतुप्रीत्यर्थः ओं केतुं कृण्वन्

केतवे • केतवे साङ्गाय: चित्रगुप्तब्रह्मसूं पा धिदेवताप्रत्य • भो केतो इमं ब • भ
वा । गणानां त्वा ग्रसमदो गणः श्री विनायकप्रीत्यर्थं • गणानां त्वा • विनायका
य सां • सिद्धिबुद्धिसहिताय इमं ब • जातवेदसे कश्यपो • पृ । दुर्गाप्रीत्यर्थं • जातवेद
से । दुर्गायै साङ्गायै सपरिवारायै सा • यै सच्चा • यै इमं • भो दुर्गे इमं ब • केनीह्रेमरुतैजी • वं नव
वायोवर्भांगिरसो वा • श्री वायुप्रीत्यर्थं : । तव वायवृतस्पते • वायवे साङ्गाय • भो
वायो इमं ब • । श्री [illegible] दत्त आकाश गायत्री आकाशप्रीत्यर्थं • आदित्यल
स्परे • । आकाशाय साङ्गाय: भो आकाश इमं • एषो अर्घ्यो ब्रस्करावो मिनो गायत्री
अश्विनी प्री • ॐ एषो ऽर्घाश्व्यर्घ्यो । अश्विभ्यां साङ्गाभ्यां स • भ्यां सायु • भ्यां भ्रसर •

भ्यांइमं·ओआश्विनोइमंबलिंगृह्णातुममस·कर्तारोहोम·रोशुभकन्यारोशशान्तिःऐपुष्टि·ओभव
१७ तां।।वास्तोष्पतेवसिष्ठो·एवास्तोष्पतिप्री·ॐवास्तोष्पतेप्रति·१वास्तोष्पतयेसांगाय·
ओवास्तोष्पतेइमं·१गायत्र्याविश्वामित्रभुवनेश्वरीगायत्रीभुव·बलिं·भूर्भुवःस्वःगायत्र्या
भुवनेश्वर्यै·ओगायत्र्याविश्वामित्रभुवनेश्वरीइमंबलिं·त्रीहोमःभवरंइन्द्राणीवृषाकपिंइन्द्राणी २५
पंक्तिःइन्द्राणीप्रीत्य·ॐइन्द्राणीमासुनारिषु·१इन्द्राण्यैसांगायैःओइन्द्राणीइमं·त्रीहोम·व·
उद्धत्वाविश्वामित्रइन्द्रोगायत्रीइन्द्रप्री·ॐइन्द्रंत्वावृषभंवयं·१इन्द्रायसांगा·ओइन्द्रइमंबलिं·
भवायथालिंगबलिंदद्यात्।।ततोक्षेत्रपालबलिःक्षेत्रस्यपतिनावामदेवःक्षेत्राधिपतिरनु राम·
ष्टुप्क्षेत्रपालप्री·क्षेत्रस्यपतिना·ॐक्षेत्रपालायभूतप्रेतपिशाचब्रह्मराक्षसडाकिनी १७
शाकिनीवेतालादिपरिवारयुतायइमंसदीपंसताम्बूलंसदक्षिणंमाषभक्तबलिंसमर्पया

यि।उत्सृजेत्।नमोक्षेत्रपालइमंबलिंग्रहाणममसकु॰शांतिदःपुष्टिदस्तुष्टिदेतिसंप्रार्थ्य।
शंनःपृथिवीशिवमंतरिक्षंद्यौर्नोदेव्यभयंनोअस्तुशिवादिशःप्रदिशउद्दिशोनआपोविद्युतः
पं परिपांतुसर्वतःशांतिःशांतिः।हस्तौपादौप्रक्षाल्याचम्यपूर्णाहुतिंकुर्यात्।द्वादशगृहीतमाज्यं
स्रुचिंपूरयित्वा।तदुपरिफलंनिधायतिष्ठन्।समुद्रादूर्मिरितितृचस्यगोतमोवामदेवोग्निस्त्रि
ष्टु॰पूर्णाहुतिहोमेविनियोगः।ॐसमुद्रादूर्मिर्मधुमांउदारदुपांशुनासममृतत्वमानट्।घृतस्य
नामगुह्यंयदस्तिजिह्वादेवानाममृतस्यनाभिः।वयंनामप्रब्रवामाघृतस्यास्मिंन्यज्ञेधार
यामानमोभिः।उपब्रह्माशृणवच्छस्यमानंचतुःशृंगोवमीद्गौरएतत्।चत्वारिशृंगा॰योस्य१वि ३
वेश।मूर्द्धानंदिवोबार्हस्पत्योभरद्वाजोवैश्वानरस्त्रिष्टुप्।पूर्णाहुतिः।ॐमूर्द्धानंदिवोअरतिं
पृथिव्यावैश्वानरमृतआजातमग्निंकविंसम्राजमतिथिंजनानामासंनापात्रंजनयंतदे

।७।

वाः।पुनस्त्वाग्निर्वसुरुद्रादित्यास्त्रिष्टुप्॰ ॐ पुनस्त्वादित्यारुद्रावसवःसमिंधतांपुनर्ब्रह्माणो
१८ वसुनीथयज्ञैःघृतेनत्वंतन्वंवर्धयस्वसत्याःसंतुयजमानस्यकामाः।पूर्णादर्विविश्वेदेवाः।
18 शतक्रतुरनुष्टुप्।पूर्णादर्विपरापत॰ सप्ततेअग्नेसप्तवानग्निर्जगती।सप्ततेअग्नेसमिधःसप्त
जिह्वाःसप्तऋषयःसप्तधामप्रियाणि।सप्तहोत्राःसप्तधात्वायजंतिसप्तयोनिरापृण
स्वाघृतेन।धामंतेवामदेवआपोजगती।पूर्णा॰।धामंतेविश्वंभुवनमधिश्रितमंतःसमुद्रेह
द्यं१तरायुषि।अपामनीकेसमिथेयआभृतस्तमश्याममधुमंतंतऊर्मिंस्वाहा।इदमग्नयेवै
श्वानरायवसुरुद्रादित्येभ्यःशतक्रतवेसप्तवतेअग्नयेअद्भ्यश्चनमम।पूर्णपात्रविमोकादि
संस्राजयांतंकृत्वा।ततश्चतुःकलशेभ्यःपात्रांतरेकिंचिज्जलंगृहीत्वापल्लवादिनिक्षिप्य। राम॰
सपत्नीकयजमानस्याचार्यऋत्विक्सहितोभिषेकंकुर्यात्।अभिषेकेपत्नीवामतःतत्र १८
मंत्राः।आपोहिष्ठेतिनवर्चस्यअंबरीषसिंधुद्वीपआपोगायत्री।पंचमीवर्धमाना

सप्तमीप्रतिष्ठांत्यैद्वेअनुष्टुभौअभिषेकेविनियोगः। ॐआपोहिष्ठाद्यय एकोऽहिद्विदयत्तरत्तिराज
गणोगोतम ऋ॰ उष्णिक॰ अभिषे॰ यएकरहिद्वदयतेवसुमत्तीयदाशुषेऽशानोअप्रतिष्कुतो ऽ
द्रोऽग्ः त्रिमिष्ठंदेवसवितइतिसप्तर्चस्यसूक्तस्यवसिष्ठ आयानोत्रयाणामाग्निस्ततस्रतु
र्णांविश्वेदेवाआद्यागायत्रीद्वितीयानुष्टुप्पतिस्त्रोगायत्र्योद्वेअनुष्टुभौअभिषेकः त्रिमिष्ठं
देवसवितर्वर्षिष्ठैसोमधामभिःअग्नेदक्षैःपुनीहिनःपुनंतुमांदेवजनापुनंतुवसवोधि
या। विश्वेदेवाःपुनीतमाजातवेदःपुनीहिमा। आप्यायस्वप्रस्यंदस्वसोमविश्वेभिरंशुभिः।
देवेभ्यउत्तमंहविः। उपप्रियंपनिप्नतंयुवानमाहुतीवृधं। अगन्मविभ्रतोनमः। अलाय्यस्य
मा परशुर्ननाशतं पवस्वदेवसोम। आखुंचिदेवदेवसोमर्यः पावमानीर्ध्येत्यृषिभिःसंभृतंर
सं। सर्वंसपूतमश्नातिस्वदितंमातरिश्वना। पावमानीर्योअध्येत्यृषिभिःसंभसंभृतंरंतस्मै

सरस्वतीदुहेक्षीरंसर्पिर्मधूदकं।उभयंशृण्वच्चनइन्द्रोबृहती।ओमि·ॐउभयंशृणव
१९ 19 च्चनइन्द्रोअर्वागिदंवचः।सत्राच्यामघवासोमपीतयेधियाशविष्ठआगमत्।स्वस्तिदाविशो
यमीन्द्रोनुष्टुप्।अभिः स्वस्तिदाविशस्पतिर्वृत्रहाविमृधोवशी।वृषेन्द्रःपुरएतुनःसोमपाअ
भयंकरः।त्र्यंबकंवसिष्ठोरुद्रोनुष्टुप्अभि·त्र्यंबकंय·।जातवेदसेकश्यपोदुर्गात्रिष्टुप्अभि·
जातवेदसेसुनवाम·।समुद्रज्येष्ठाश्चत्वारःवसिष्ठआपस्त्रिष्टुप्अभि·।ॐसमुद्रज्ये
ष्ठाः।४आयन्तामितितिस्रःप्रजापतिऋषयआपोनुष्टुप्।आयन्तामिहदेवाः।इमाआप·
देवस्यत्वाआपस्तंबः।देवस्यत्वास·म्यां।ओमश्विनोर्भैषज्येनतेजसेब्रह्मवर्चसायाभिषिं राम·
चामिदेवस्यत्वा·।म्यांसरस्वत्यैभैषज्येनवीर्यायान्नाद्यायाभिषिंचामि।देवस्यत्वा।म्यांइं १९
द्रस्येन्द्रियेणश्रियैयशसेबलायाभिषिंचामि।देवस्यत्वा·म्यांसरस्वत्यैवाचोयंतुर्यंत्रेण

ग्नेः स्त्वा साम्राज्येनाभिषिंचामि। इंद्रस्य बृहस्पतेस्त्वा साम्राज्येनाभिषिंचामी। तमीशानं जगत
मईशानो जगती। अभिषे०। तमीशानं। तमुष्टुहि। त्वांगिरस्तक्तिरश्छिरुद्रस्त्रिष्टुप् ईशाभिषेके०।
तमुष्टुहि०। भुवनस्य पित्तरं स्त्र जिथ्या रुद्रस्त्रीष्टुप्। ॐ भुवनस्य पितरं गीर्भिराभी रुद्रं दिवा
वर्धया रुद्रमक्तौ। बृहंतमृष्वमजरं सुषुम्नमृधग्धुवेम कविनेषितासः। या ते रुद्रेति कश्यप
रुद्रास्वराल नुष्टुप्। या ते रुद्र शिवा तनूर घोरा पाप काशिनी। तया नस्तन्वा शंतमया गि
रिशंताभि चाकशीहि। यज्जाग्रत इति षण्णां प्रजापतिर्मनस्त्रिष्टुप् अभि०। ॐ यज्जाग्रतो
दूरमुदैतु दैवं तदु सुप्तस्य तथैवैति। दूरंगमं ज्योतिषां ज्योतिरेकं तन्मे मनः शिवसंकल्पम
स्तु॥१॥ येन कर्माण्यप०।२। यत्प्रज्ञानमुत०।३। येनेदं भूतं भुवनं भ०।४। यस्मिन्नृचः साम०।५।
सुषारथिरश्वानि०।६। इंद्र त्वा वृषभमिति पंचानां विश्वामित्र इंद्रो गायत्री अभिषे०। इंद्र त्वा

२०

20

वृषभंवयंसुतेसोमेहवामहेसपाहिमध्वोअंधसः।इंद्रक्रतुविदंसुतंसोमंहर्यपुरुष्टुत।पि
बावृषस्वतातृपिं।इंद्रप्रणोधितावानंयज्ञंविश्वेभिर्देवेभिः तिरस्तवानविश्पते।इंद्रसोमाः
सुताइमेतवप्रयंतिसत्पते क्षयंचन्द्रासइंदवः दधिष्वाजठरेसुतंसोममिंद्रवरेण्य।तवद्युक्ता
सइंदवः।सुरास्त्वामित्यादिश्लोकैरभिषिंचेत्॥ग्रहाणामादिरादित्योलोकरक्षणका
रकः।विषमस्था॰नुतेविधुः॥१॥भूमिपुत्रोमहातेजाजगतांभयकृत्सदा।वृष्टिकृद्वृष्टिह
र्ताचपीडांतेकुजः॥३॥उत्पातरूपोजगतांचंद्रपुत्रोमहाद्युतिः।सूर्यप्रियकरोविद्वान्पी ६८५२
डां॰तेबुधः॥४॥देवमंत्रीविशालाक्षः सदालोकहितेरतः।अनेकशिष्यैःसंपूर्णः॰पीडांतेगुरुः॥५॥ रम॰
दैत्यमंत्रीगुरुस्तेषांप्राणदश्चमहामतिः।प्रभुस्ताराग्रहाणांचपी॰भृगुः॥६॥सूर्यपुत्रोदीर्घ २०
देहोविशालाक्षःशिवप्रियः।मंदचारः प्रसन्नात्मापी॰उतेशनिः॥७॥महाशनोमहावक्त्रोदीर्घदं

ष्टो महाबलः ।५ अनन्तस्त्वोर्ध्वकेशाश्च पीडां दहंतु ते नमः ।६ अनेकरूपवर्णाश्च शतशोऽथ सहस्रशः ।७
स्मान्तरूपो जनानां पीडां दहन्तु ते शिखी ।८ ततः कलशोदकेन सुस्नातौ दंपती शुक्लवासो गंधमाल्या
दिभूषित्वा । ततो यजमानोऽग्निं संपूज्याचार्यादीन् गंधपुष्पवस्त्रालंकारादिभिर्यथाशक्ति पूज
यित्वा । कृतस्य सनवग्रहमखरजोदर्शनशांतिकर्मणः सांगताऽर्थं आचार्याय धेनुप्रतिनिधि
भूतं द्रव्यं हिरण्यं अग्निदैवतं तुभ्यमहं संप्रददे । ब्रह्मणे अनडुहप्रतिनिधिभूतं यथाशक्तिद्रव्यं
दातुमहं ॥ रुद्रजापिने सदक्षिणं कलशमनड्वाहं दातुमहमुत्सृजे । ऋत्विग्भ्यः यथाविभागं दक्षि
णां दातुमहमुत्सृज्ये । नानानामगोत्रेभ्यो ब्राह्मणेभ्यो भूयसिं दक्षिणां दातुमहमुत्सृज्ये । ततो
ग्रहाणां भुवनेश्वर्यादीनां चोत्तरपूजां पंचोपचारैः कृत्वा । समाप्य । उत्तिष्ठ ब्रह्मणस्पते । अ
भ्यारभिदद्यो ।१ यांतु देवगणाः सर्वे पूजामादाय पार्थिवी ।२ इष्टकामसमृद्ध्यर्थं पुनरागमना

यचा। अनेन मंत्रेण विसर्ज्य। इमां सोपस्करां भुवनेश्वरी प्रतिमां इंद्राणीं इंद्रप्रतिमां च ग्रहपीठं च
२१ तुभ्यमहं संप्रददे। आचार्यहस्ते प्रतिपादयेत्। अग्निं संपूज्य। गच्छ गच्छ सुरश्रेष्ठ स्वस्थाने परमेश्वरः। य
त्र ब्रह्मादयो देवास्तत्र गच्छ हुताशनः। शांति पठेत्। आ नो भद्रा १० स्वस्ति नो मिमीता ५
शं न इंद्राग्नी ४ तच्चक्षुर्देव २ तच्छंयोः १ सर्वशांति पठेत् विनी। एतस्य सनवग्रहमखरजोदर्शनशां
तिकर्मणः सांगता सिद्ध्यर्थं भुवनेश्वरीप्रीत्यर्थं इंद्राणी इंद्रप्रीत्यर्थं प्रत्येकं त्रीन्त्रीन्ब्राह्मणा
न्भोजयेत्। विप्राशिषो गृहीत्वा। सुहृद्युतो भुंजीत। एवं कृते सर्वारिष्टशांतिर्भवति।
ततः शुभकाले गर्भाधानं कुर्यात्। प्रसूतदोषो यदि दृश्यते तत्सुख्यं ततः शांतिकर्म कार्यं विसर्जि
ये देवतादेवकार्यां यावद्रजोदर्शनमिष्टकाले ज्योतिर्विदिष्टे नोक्तः। इति शांति समाप्तः। अथ चे राम.
द्रसूर्योपरागकाले प्रथमरजोदर्शने शांतिर्विशेषः उच्यते। ग्रहणमात्रे तिथयमेव। अथ प्रयोगः॥ २१

देशकालौ संकीर्त्य मम पत्न्याश्चंद्रोपरागे प्रथमरजोदर्शनसूचितारिष्टनिरासनद्वारा श्रीपरमे
श्वरप्रीत्यर्थं सग्रहनवमखांशांतिं करिष्ये ॥ सूर्योपरागे प्रथमरजोत्पत्तौ इति वदेत् ॥ ततः आचार्यः
शुचिदेशे गोमयेनोपलिप्य तत्र पंचवर्णैरजोभिरष्टदलं पद्मं कृत्वा ततः परितो नवं श्वेतवस्त्रमु
द्दशं संस्थाप्य यथाशक्ति रजतनिर्मितं चंद्रप्रतिमां यथाशक्ति सुवर्णनिर्मितं तन्मंत्रेणैव मम मं
त्रेणैव ॐ अश्वनानावाहयामि नमः इति प्रणवादिनमोंतेस्थापयेत् । मंत्रास्तावत्त्वेवानामष्टे
वाक्यानीति प्रसिद्धाः नामानि तु । अश्विनौ । यमः अग्निः प्रजापतिः सोमा रुद्रः अदितिः बृह
स्पतिः सर्पाः पितरः भगः अर्यमा सविता । त्वष्टा । वायुः इंद्राग्नी मित्रः इंद्रः निरृतिः आपः वि
श्वेदेवाः । विष्णुः । वसवः वरुणः । अजैकपात् । अहिर्बुध्न्यः पूषा इति । एवं देवतास्त्रयमावाह्यैभिरेव
मंत्रैः षोडशोपचारैः पूजयेत् । तत्र चंद्रादिभ्यो नव ग्रहादिगंधमाल्यादिभिः पूजयेत् । सूर्यरक्त
व

२२

वस्त्ररक्तचंदनरक्ताक्षतकर्वीरपुष्पादिभिः। राहुकेत्वोसितानि नक्षत्रदेवताभ्यः श्वेतानि। ततः प
श्चिमतोऽग्निं ग्रहांश्च प्रतिष्ठाप्यावाहनपूर्वकं संपूज्यान्वाधानं कुर्यात्। यथाद्येसमिधो ग्रही
त्वा चरुषी आज्येनेत्यंतमुक्त्वा पूर्ववंन्नवग्रहानुद्दिश्य प्राष्टाशताष्टाविंशत्यन्यतमाष्टसंख्या
काभिः दूर्वाज्यतिलाहुतिभिः। नक्षत्रदेवतामुकसंख्यायाऽमुकसमिदाज्यचरुतिला
हुतिभिर्यक्ष्ये। सूर्यग्रहे तु चंद्रस्थाने सूर्यममुकसंख्यायाऽर्कसमिदाज्यचरुतिलाहुतिभि
रितिवदेत्। शेषेण स्विष्टकृतमित्यादि। एवमन्वाधाय प्रणीताप्रणयनांतं कृत्वा त्रिभ्यो
मनुष्येत्वेति चतुरश्चतुरो मुष्टीन्निरुप्य चरुं श्रपयित्वाज्यभागांतं कुर्यात्। ततो यजमानो द राम:
क्षिणतो देवता उद्दिश्य त्यजेत्। ततोऽन्वाधानक्रमेण जुहुयुः। तत्र तिसृणां दूर्वा[illegible]णामेकैका २२
हुतिः। समिधश्च त्रिमध्वभक्ताः कार्याः। ततः स्विष्टकृदादि पूर्णाहुत्यंतं प्राग्वत्। ततः आचा

र्य एकस्मिन्कलशे जलपूर्णे पंचगव्यानि पंचपल्लवानि सर्वौषधी कलके दूर्वाकुशांश्च निक्षि
प्य सस्वस्तिकं दंपती पूर्ववदभिषिंचेत् देभिर्मंत्रैः। आपोहिष्ठा३ इमं मे गंगे२ तत्त्वा यामि१
अन्येपि समुद्रज्येष्ठा इत्यादयः सुरास्त्वा इत्यादयः पौराणाश्च। ततस्माने दक्षिणादानप्रतिपा
दनादि पूर्ववत्॥ पदानुपूर्वशांतिसमुच्चयस्तदा कालैक्यात्कर्त्रैक्याच्चाग्नेयादिवत्तत्रप्रयो
ज५ गः ततो यजमानो देशकालौ स्मृत्वा मम अस्याः पत्न्याः प्रथमरजोदर्शने अमुकदुष्टमासति
थ्यादि अमुकग्रहकरण[illegible] चितेत्यादि संकल्पात् विकप्रजांतं निदध्यात्। तत आचार्यो भुव
न्वर्यादि प्रजांतः प्रावापश्चाद्धात ततउदीच्यां चंद्रादीन्संपूज्य यथोपक्रमं निर्वापहोमाभि
षेकान्कुर्यादिति विशेषः। अन्यत्सर्वं समानं॥ इति ग्रहणे रजोदर्शन शान्तिः। अथ विच्छि
न्नस्य गृह्याग्नेः पुनः संधानं। आचम्य प्राणानायम्य देशकालौ संकीर्त्य एतावंतं कालं

पं

त्याग्निविछेदजनितप्रत्यवायपरिहारद्वाराश्रीपरमेश्वरप्रीत्यर्थंअमुकप्रायश्चित्तमनु
२२ कप्रत्याम्नायद्वारायथाशक्तियथाकालंकरिष्ये।पुनः।अग्निविछेदलुप्तानांसायंप्रा
तर्होमानांतथादर्शपूर्णमासस्थालीपाकानांचयथाशक्तिवृत्त्यादिरूपंश्राज्येचनाना
23 नामगोत्रेभ्योब्राह्मणेभ्योदातुमहमुत्सृज्ये।विछिन्नस्यगृह्याग्नेःपुनःसंधानंकरिष्ये।
स्वस्मिन्नन्वाहितेआविरत्याधारांतमुक्त्वात्रप्रधाने।अग्निंपवमानेत्री।२।अग्निंप्रजाप
तिंचाज्येनअर्यमणमग्निंवरुणमग्निंपूषणमग्निंप्रजापतिंचलाजाद्रव्येणचतुर्वारंसूर्यां
सावित्रीमाज्येनशेषेणस्विष्टकृतमित्यादिसद्योयक्ष्ये।परिसमूहनादिप्राक्कृतपात्रासाद राम०
नेविशेषेनप्रोक्षणीस्रुवंप्रणीतामाज्यपात्रेलाजांश्शूर्पमिदमावर्हिश्चदधिप्राशनपात्रे २२
दधिपात्रंचासादयेत्।आज्यसंस्कारादिआधारांतेकृत्वाप्रधानाज्याहुतीर्जुहुयात्।अग्न

आयूंषि पवस इति तिसृणां शतं वैखानस ऋषयः। अग्निः पवमानो देवता गायत्री छंदः।
विछिन्नगृह्याग्निपुनःसंधान आज्यहोमे विनियोगः। एवं सर्वत्र। ॐ अग्न आयूंषि पवस आ
सुवोर्जमिषं च नः। आरे बाधस्व दुच्छुनां स्वाहा। अग्नये पवमानायेदं०। ॐ अग्निरृषिः पवमा
नः पांचजन्यः पुरोहितः। तमीमहे महागयं स्वाहा। ॐ अग्ने पवस्व स्वपा अस्मे वर्चः सुवीर्यं। दध
द्रयिं मयि पोषं स्वाहा। अग्नये पवमानायेदं न मम एवं सर्वत्र त्यागः। त्वमर्यमा वसुश्रुतो अग्नि
स्त्रिष्टुप् गृह्याग्निपु०। ॐ त्वमर्यमा भवसि यत्कनीनां नाम स्वधावन् गुह्यं बिभर्षि। अंजंति मि
त्रं सुधितं न गोभिर्यद्दंपती समनसा कृणोषि स्वाहा। अग्नय इदं न मम। प्रजापते हिरण्य
गर्भः प्रजापतिस्त्रिष्टुप् गृह्याग्निपुनःसं०। ॐ प्रजापते न त्वदेतान्यन्यो विश्वा जातानि
परिता बभूव। यत्कामास्ते जुहुमस्तन्नो अस्तु वयं स्याम पतयो रयीणां स्वाहा। प्रजापत

पर्य्यग्न्यपत्न्याः स्वाञ्जलिं तं जलौ पतिराज्येनोपस्तीर्य द्विर्लाजानोप्य पंचावत्तीतु त्रिरो
२४ प्यमृस्यानभिधार्यञ्जलिस्थानभिधार्यतिष्ठंतिष्ठंत्याञ्जलिं स्वकराभ्यां धृत्वा। अर्यम
णं वरुणं पूषणमिति तिसृणां वामदेव ऋषिः अर्यमाग्निर्वरुणाग्निः पूषाग्निर्देवता अनुष्टु
24 प् छंदः गृह्याग्निपुनःसंधानप्रधानलाजहोमे ॐ अर्यमणं नु देवं कन्याग्निमयक्षत। स इमां
देवो अर्यमाः अर्यमेऽग्नये। प्रेतो मुंचातु नामुतः स्वाहा। वरुणं नु देवं। स इमां देवो वरुणः प्र
वरुणायाग्नये। पूषणं नु देवं क। या १ मयक्षत। स इमां देवः पूषाप्रे। स्वाहा। पूषाग्नय इ। तत
शूर्पकोणेनावशिष्टान् सर्वलाजान् हुत्वा प्रजापतये स्वाहा। प्रजापतय इ। आ नः प्रजामि राम०
ति चतसृणां सूर्यासावित्री सूर्यासावित्री आद्या जगती द्वितीया त्रिष्टुप् अंत्ये द्वे अनुष्टुभौ २४
गृह्याग्निपुनःसंधानप्रधानाज्यहोमे विनियोगः। ॐ आ नः प्रजां जनयतु प्रजापतिराज

रसायसमनक्तुर्यमा।अदुर्मंगलीपतिलोकमाविशशन्नोभवद्विपदेशंचतुष्पदेस्वाहासूर्या
येसाविश्याइदं।ॐअघोरचक्षुरपतिघ्न्येधि शिवापशुभ्यः सुमनाः सुवर्चाः।वीरसूर्देवका
मास्योनाशन्नो०देस्वाहा।सूर्यायैसावित्र्याः।इमांत्वमिंद्रमीढ्वःसुपुत्रांसुभगांकृणु।दशा
स्यांपुत्रानांदेहिपतिमेकादशंकृधिस्वाहासूर्यायै०।ॐसम्राज्ञी०सूर्यासा०समंजंत्वित्य
स्यसूर्यासावित्र्यनुष्टुप्।दधिप्राशनेविनियोगः।ॐसमंजंतुविश्वेदेवाःसमापोहृदयानि
नौ।सम्मातरिश्वासंधातासमुदेष्ट्रीदधातु।अनेनमंत्रेणस्वयंप्राश्यतच्छेषंपत्नीमपिप्रा
शयेत्।आज्यसेषेणवाहृदयांजनंकुर्यात्।ततःआज्येनस्विष्टकृदादिहोमशेषंसमापयेत्।
इतिपुनःसंधानं।अत्रकारिका।उपलेपादिकंकुर्यात्धारान्तेविवाहवत्।विवाहान्याऊतीज
त्वालाजाहोमोभवेदिह।गृहप्रवेशनीयाश्चऊत्वास्याह्नंतयांजनंपरिणीत्यादिनास्त्वला।

ज्ञानावपतिस्त्वयं । समानतंत्रकं चेद्द होमद्वयमिदं भवेदिह ॥ अथ गर्भाधानं । रजोदर्शनात्षोडशाहो
२५ रात्राणि ऋतुस्तन्मध्ये आद्यरात्रिचतुष्कं पर्वादिनिषिद्धदिनानि च । वर्जयित्वा मघामूलादि
व्यतिरिक्ते दैवज्ञोक्ते शुभे काले दंपत्योश्चंद्रानुकूले गर्भाधानं कार्यं । तत्रापि युग्मासु रात्रि
षु पुत्राः अयुग्मासु कन्या जायंते इत्यादि ज्ञेयं । आचम्य प्राणानायम्य देशकालौ संकीर्त्य अ
स्याः मम भार्यायाः प्रतिगर्भसंस्कारातिशयद्वारा अस्यां जनिष्यमाणसर्वगर्भाणां बीजग
र्भसमुद्भवैनोनिवर्हणद्वारा श्रीपरमेश्वरप्रीत्यर्थं गर्भाधानाख्यं कर्माहं करिष्ये । इति संकल्पः ।
गणेशपूजनं स्वस्तिवाचनं मातृकापूजनं नांदीश्राद्धं कुर्यात् । समिद्द्वयमादाय गर्भाधानहो राम
मे करिष्यामि देवतापरिग्रहार्थमन्वाधानं करिष्ये । अस्मिन्नन्वाहिते अग्नावित्यादि चक्षुषी २५
आज्येनेत्यंतमुक्त्वा प्रजापतिं चरुणा विष्णुं षट्कारमाज्येन प्रजापतिं चाज्येन शेषेण स्विष्टकृ

म
तमित्यादिसंध्यायन्देवंसमिद्वयमग्नावाधायपरिसमूहनादिपूर्णपात्रनिधानांतंकृत्वाप्रजापतये
त्वाजुष्टंनिर्वपामीत्यादिनाज्यभागांतंकृत्वावधानधर्मेणावदाय ॐ प्रजापतयेस्वाहेतिचरुणैष्टे
काऊंतंकृत्वाविष्णुर्योनिमितितिसृणांत्वष्टाविष्णुरनुष्टुप्।गर्भाधानेप्रधानाज्यहोमेविनि
योगः।ॐ विष्णुर्योनिंकल्पयतुत्वष्टारूपाणिपिंशतु।आसिंचतुप्रजापतिर्धातागर्भंदधातुते
स्वाहाविष्णवइदं।ॐ गर्भंधेहिसिनीवालिगर्भंधेहिसरस्वति।गर्भंतेअश्विनौदेवावाधत्तांपुष्क
रस्रजास्वाहा।विष्णवइदं।ॐ हिरण्ययीअरणीयंनिर्मथतोअश्विना।तंतेगर्भंहवामहेदशमेमा
सिसूतवेस्वाहाविष्णवः।नेजमेषइतितिसृणांत्वष्टाविष्णुरनुष्टुप्गर्भाधानप्रधानाज्यहोमे।
नेजमेषपरापतसुपुत्रःपुनरापत।अस्यैमेपुत्रकामायैगर्भमाधेहियःपुमान्स्वाहाविष्णवइदं।य
थेयंपृथिवीमह्युत्तानागर्भमादधे।एवंतंगर्भमाधेहिदशमेमासिसूतवेस्वाहा।विष्णवइदंविष्णो

श्रेष्ठेनरूपेणास्यांनार्यांगवीन्यांपुमांसंपुत्रमाधेहिदशमेमासिसूतवेस्वाहा।विष्णवइदं॰
२६ प्रजापतेहिरण्यगर्भःप्रजापतिस्त्रिष्टुप्गर्भाधानाज्य॰प्रजापतेनत्वा।॰प्रजापतयइदं॰एवं
सप्राज्याहुतीर्जुहुयात्।अयनःशोशुचदघमित्यस्यसूक्तस्यकुत्सोग्निर्गायत्रीपत्न्यामूर्धा
28 भिमर्शनेवि॰अपनःशोशुचद सुक्षेत्रीयासुगातुयावसूयाचयजामहेअपनःशोशुचदघं
पनःशोशुचदघं॰अपनःशोशुचदघंप्रयद्भन्दिष्ठएषांप्रास्माकासश्चसूरयः।अपनः।प्रयत्तेअ
ग्नेसूरयोजायेमहिप्रतेवयं।अपनःप्रयदग्नेःसहस्वतोविश्वतोमुखयन्तिभानवः।यन्तिभानवः
अपनःत्वंहिविश्वतोमुखविश्वतःपरिभूरसि।अपनद्विषोनोविश्वतोमुखातिनावेवपारय। राम॰
अपनःसनःसिंधुमिवनावयातिपर्षास्वस्तये।अपनः।याःफलिनीरित्यस्यआथर्वणोभि २९
षगोषध्योनुष्टुप्।याःफलिनीर्याअफला॰एतांजपित्वावधेनदस्युमित्तिप्तणंवसुश्चत्येसि

स्त्रिष्टुप्। अग्न्युप० वधेनदस्युंप्रहि चातयस्ववयः कृण्वानः स्तन्वे १ स्वायै। पिपर्षियत्सहसस्पुत्र
देवान्त्सो अग्ने पाहि नृतम वाजे अस्मान्। वयं ते अग्न उक्थैर्विधेम वयं हव्यैः पावक भद्रशोचे। अस्मे
रयिं विश्ववारं समिन्वास्मे विश्वानि द्रविणानि धेहि। अस्माकमग्ने अध्वरं जुषस्व सहसः सूनो त्रि
षधस्थ हव्यं। वयं देवेषु सुकृतः स्याम शर्मणा नस्त्रिवरूथेन पाहि। विश्वानि नो धाते स्वस्ति अग्नि
स्तु विश्रवस्तममिति द्वयोर्वसूयवोग्निरनुष्टुप् अग्न्युप० ॐ अग्निस्तु विश्रवस्तमं तु विब्रह्माण
मुत्तमं। अतूर्तं श्रावयत्पतिं पुत्रं ददाति दाशुषे। अग्निर्ददाति सत्पतिं सासाह यो युधा नृभिः। अ
ग्निरत्यं रघुष्यदं जेतारमपराजितं। इत्यष्टाभिरग्निमुपस्थाय स्विष्टकृदादि होमशेषं समाप्य
सूर्यो नो दिवस्पात्विति पंचर्चस्य सूक्तस्य चक्षुः सूर्यो गायत्री सूर्योपस्थाने० सूर्यो दिवस्पातु वा
तो अंतरिक्षात्। अग्निर्नः पार्थिवेभ्यः जोषा सवितर्यस्य ते हरः शतं सवां अर्हति पाहि नो दिद्युतः

पतंत्साः चक्षुर्नोदेवः सविता चक्षुर्न उत पर्वतः चक्षुर्धाता दधातु नः। चक्षुर्नो धेहि चक्षुषे चक्षु
२७ र्विख्यै तनूभ्यः सं चेदं वि च पश्येम सुसंदृशं त्वा वयं प्रतिपश्येम सूर्या विपश्येम नृचक्षसः। स
पत्नीकः सूर्यमुपस्थाय। ॐ स्वगंधकल्के दूर्वाकल्के वा सत्क्षमवस्त्रे निक्षिप्य। उदीर्ष्वातिद्वयोः
27 सूर्यासावित्री सूर्यासावित्री आद्यास्त्रिष्टुवंत्यानुष्टुप्भार्यायादक्षिणनासापुटे
स्वगंधरससेचने विनियोगः। ॐ उदीर्ष्वातः पतिवती ह्येषा विश्वावसुं नमसा गीर्भिरीळे। अ
न्यामिच्छ पितृषदं व्यक्तां स ते भागो जनुषा तस्य विद्धि। उदीर्ष्वातो विश्वावसो नमसेळामहे
त्वा। अन्यामिच्छ प्रफर्व्यं सं जायां पत्या सृज। स्वाहा २ इति वामभागोपविष्टाया भार्याया द पा राम०
क्षिणनासाबिले ॐ स्वगंधादिरसं सिक्त्वा तद्रसे उदरं गते तामाचमयेत् गंधर्वस्य विश्वा २७
वसो मुखमसीति मंत्रेण होमो कृष्णादिभिर्विष्णुर्योनिं मिमितिति सृभिर्नेजमेषेति तिसृ

मिरंगुलिभिर्योनिमभिमृश्य मंत्रां पूर्वंनि । त्यस्यस्त्वर्यो सावित्री त्वर्यो सा वि त्रित्रिष्टुप् जपे । ॐ त्व
पूर्षं छिवतमामेरयस्व यस्यां वीजं मनुष्या २ वपंति यानुउरूउशती विश्रयाति यस्यामुशन्तः
प्रहराम शेपं । यो गर्भमोषधीनामित्यस्य वसिष्ठः पर्जन्यो गायत्री जपे । यो गर्भमोषधीनां
गवां कृणोत्यर्वतां । पर्जन्यः पुरुषीणां । अहं गर्भं प्रजाकं प्रजापत्यो गर्भं द्रुति ष्टुप् जपे ।
अहं गर्भमादधामोषधीष्वहं विश्वेषु भुवनेषंतः । अहं प्रजा अजनयं पृथिव्यामहं जनिभ्यो
परीषु पुत्रान् । इति त्रीन्मंत्रान् जपित्वा सकृदुपगच्छेत् । ततः प्राणे तेरे तोदधाम्यमुकशर्मा यथा
भूमिरग्निगर्भा यथा द्यौरिंद्रेण गर्भिणी । वायुर्यथा दिशां गर्भ एवं ते गर्भं दधामि । अमुकशर्मा
इति प्रथमवचनांते स्वनाम वदेत् स्त्रीरुपयमभिमृश्याचामेत् । इदानीं सिष्टानस्यं देलेव
स्विष्टकृदादिहोमशेषं समाप्य वृत्तस्य गर्भाधानं । यथाशक्ति ब्राह्मणान्भोजयिष्या न्म

२८

यसीदत्वाकोर्भश्चरार्थएणंकृत्वा ॥ यदिप्रथमरजोदर्शनं दुष्टतिथिवारनक्षत्रेषुजायंतेतदादो
षपरिहारायशौनकोक्तांशांतिंकृत्वाप्रशस्ततिथ्यादिष्वर्तुदर्शनपर्यंतंतस्यागमनंवर्ज्यंत
दाज्योतिर्वसिष्ठः प्रभृतदोषोयादिदृस्यतेतत्पुष्पेततः शांतिककर्मकार्यंमंः ॥ एतत्कर्मभि
रणोः प्रायश्चित्तमहाचार्यैः ॥ गर्भाधानस्याकरणात्तस्यांजातदुष्पाति ॥ अकृत्वागांद्विजेदत्वा
कुर्यात्पुंसवनेपतिरिति ॥ इतिगर्भाधानं ॥ समाप्तः शुभंमस्तु ॥ मंगलंददात् ॥ श्रीरामोजयति ॥
श्रीजगदंबादुर्गाप्रणमस्तु इदंपुस्तकंब्राजनदठाकुरोपनामस्यार्थपरार्थंच

राम० २८